॥ अथ ऋषभसूक्तम् ॥

ऋषभं मा समानानां सपत्नानां विषासहिम् । हंतारं शत्रूणां कृधि विराजं गोपतिं गवाम् ॥ १ ॥

अहमस्मि सपत्नहेंद्र इवारिष्टो अक्षतः । अधः सपत्ना मे पदोरिमे सर्वे अभिष्ठिताः ॥ २ ॥

अत्रैव वोपि नह्याम्युभे आर्त्नी इवज्यया । वाचस्पते नि षेधेमान् यथा मदधरं वदान् ॥ ३ ॥

अभिभूरहमागमं विश्वकर्मेण धाम्ना । आ वश्चित्तमावो व्रतमा वोहं समितिं ददे ॥ ४ ॥

योगक्षेमं व आदायाहं भूयासमुत्तम आ वो मूर्धानमक्रमीम् । अधस्पदान्म उद्वदत मंडूका इवोदकान्मंडूका उदकादिव ॥ ५ ॥

॥ इति ऋषभसूक्तम् संपूर्णम् ॥